Shodhshauryam, International Scientific Refereed Research Journal
© 2020 SHISRRJ | Volume 3 | Issue 1 | ISSN : 2581- 6306

# अध्यापकशिक्षायां सूचनासम्प्रेषणतकनीकेः अनुप्रयोगः



**डॉ. आरती शर्मा**
**सहायकाचार्या, शिक्षाशास्त्रविभागः**
**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्,**
**नवदेहली।**

***शोधसारांशः*- "*ज्ञानं मनुजस्य तृतीयं नेत्रम्*"** *अर्थात् ज्ञान चक्षुषैव सदसद्विवेको जागृति। अस्य पवित्रज्ञानस्य शिक्षणमधिगमश्च कथं भवति इति पृष्ठे सति शिक्षणाधिगमप्रक्रियया: मुख्यरूपेण चत्वारः अंशाः भवन्ति- 1. विषयनिष्णातः, 2. विद्यापिपासुर्विद्यार्थी, 3. निर्धारितपाठ्यवस्तु, 4. प्रभाविसम्प्रेषणम्। अद्यत्वे अनुदिनं सर्वत्रानुसन्धानम्, निष्कर्ष सम्पादनं, पुनः तस्य वैज्ञानिकपद्धतया विनियोगः इति काचन् प्रवृतिः जायमानाः वर्तते। तद्वत् शिक्षाक्षेत्रेऽपि अनुदिनं शिक्षास्वरूपं, शिक्षणव्यूहः, सम्प्रेषणप्रविधयः परिवर्तमानाः सन्ति। आधुनिकपरिप्रेक्ष्ये सम्प्रेषणप्रविधिषु सूचनासम्प्रेषणतकनीकिः महत्त्वपूर्णं स्थानं भजते। अध्यापकशिक्षायामपि सूचनासम्प्रेषणतकनीकेः अनुप्रयोगः नितरां क्रियते। अस्याः अनुप्रयोगः कथं अध्यापकशिक्षायां प्रचलति इत्यस्मिन् विषये शोधपत्रेऽस्मिन् प्रस्तूयते।*
मुख्यशब्दः– *विषयनिष्णातः, विद्यापिपासुर्विद्यार्थी, निर्धारितपाठ्यवस्तु, प्रभाविसम्प्रेषणम्,* अनुप्रयोगः, ज्ञानं, अध्यापकशिक्षा, सूचनासम्प्रेषण।

सम्प्रतिसम्पूर्णमानवजीवनं वैज्ञानिकानुसन्धानैः आविष्कारैश्च, तकनीकीभ्यः प्रभावितो विद्यते। तेन मानवानां दृष्टिरपि वैज्ञानिकी सञ्जाताऽस्ति।तथैव शिक्षाक्षेत्रेऽपि आधुनिकोपकरणानामाविर्भावेन शिक्षणेऽपि यान्त्रिकीकरणमवलोक्यते। ज्ञानस्य यान्त्रिकीकरणत्वात् सम्प्रति शिक्षा कठिनत्वेन गोपनीयत्वेन वा नावलोक्यते। परिणामतः जीवनधारणस्य मूल्यमुन्नतं जायमानं वर्तते।

दृश्यश्रव्योपकरणप्रविधिषु सर्वोपरि सङ्गणकयन्त्रस्य उद्भावनं, शिक्षाक्षेत्रे तस्य प्रयोगः, शिक्षया सह प्रविधिज्ञानं, शिक्षादर्शनं, शिक्षामापनं, मूल्याङ्कनमित्यादि शिक्षानीतिवत् शैक्षिकतकनीकिशास्त्रेणाप्येकं स्वतन्त्रस्थानमधिकृतमस्ति। शिक्षणसाधनार्थं शैक्षिकतकनीकिरेव आवश्यकमाधारं प्रदातुमर्हति।

अधुना सूचनासम्प्रेषणतकनीकिः (ICT) नित्यजीवने नैकस्थानेषु दरीदृश्यते। प्रातः आरभ्य शयनं यावत् किमपि ज्ञानम् कस्मादपि यन्त्रविशेषात् प्राप्नुमः एव वयम्।तस्य स्वरूपं विविधतया द्रष्टुं शक्यते। यथा- विकिपिडिया(Wikipedia(, चलदूरभाषयन्त्रं, सङ्गणकं, अन्तर्जालम्।

सूचनासम्प्रेषणतकनीकिः सर्वेषु विषयेषु क्षेत्रेषु वा आत्मनः अस्तित्त्वं बोधयति। तथैव अध्यापकशिक्षायामपि सूचनासम्प्रेषणतकनीकेः अनुप्रयोगः दरीदृश्यते। यतोहि एकस्य पिञ्जस्य नोदनेन त्वरितमेव बहूनां विषयाणां ज्ञानमर्जयितुं शक्यते। इन्टरनेट, सङ्गणकयन्त्रम्, चलदूरवाणीयन्त्रम्, ई-मेल, वाटस्-अप्, सोशलमीडिया इत्यादि नैकानि माध्यमानि साम्प्रतं व्यवहारे दृश्यन्ते येषां प्रयोगबलेन अध्ययनं यथेच्छया कर्तुंशक्यते। विविधचित्रैः सह ज्ञानार्जनेन विषयं चिरं यावत् स्थायि भवति।

आदौ सूचनासम्प्रेषणतकनीकेः परिभाषामवगम्य, अध्यापकशिक्षायामस्याः अनुप्रयोगः कथं क्रियते विषयेऽस्मिन्विचारयामः-

समग्ररूपेण तथ्यानां सूचनानां वा क्रमबद्ध वैज्ञानिकरीत्या, शीघ्रतया, निर्बाधरूपेण आदानप्रदानं )Exchange)एव सूचनासम्प्रेषणतकनीकिः इति वक्तुं शक्यते। आंग्लभाषायां Information communication Technology इत्युच्यते। अत्र-

**<u>Information (I)</u>**-

सूचनाः अर्थात् Data अध्यापनार्थं तथ्यानां संग्रहमेव।

सूचनाः प्रदत्तानां संसाधितमथवा संकलितम् अन्तिमरूपं परिणामं वा भवति यस्योपयोगः सार्थकरूपेण भवितुमर्हति।

**Communication (C)**-

सम्प्रेषणम् अर्थात् समानरूपेण प्रेषणम्। विनिमयम्।

शाब्दिकाशाब्दिकादीनां विचार-तथ्य-भावना-प्रभावादीनां तादृश विनिमयं येन प्राप्तसन्देशं सामूहिकरूपेण अवगम्यते, सम्प्रेषणमित्युच्यते।

**Technology (T)**-

तकनीकी।

विविध विधिप्रविधीनां, युक्तीनां, रचनाकौशलानां च अर्थपूर्णसमवायः (Network) येन शैक्षिकोद्देश्यानां प्राप्त्यर्थं प्रभावी-कुशल-सरल-द्रुतरूपेण प्रयासः विधीयते।

**ICT कथं कार्यं करोति**-

मूलतथ्यानां संकलनम्
)Raw Data Collection(
नियमानुसारेण सारयुक्तरूपे परिवर्तनम्। ↓
)Form of files, reports, records, graphs which are processed by meaningful rule and policy(
सूचनानां संकलनम्
(Charts, texts, vedio, Audio) ↓
प्रौद्योगिकी ↓
)Refining the information(
सम्प्रेषणम् ↓
)Oral/verbal(

**मौखिकसम्प्रेषणम्**- टेपरिकार्डर, सभायां भाषणम्, साक्षात्कारः, सम्मेलनम्, दूरभाषः, वार्तालापः, सामूहिकसंवादः, रेडियोप्रसारणम्, संगोष्ठ्यः।

**लिखितसम्प्रेषणम्**- प्रश्नावली, नियमावली, रेखाचित्रम्, चार्टपत्रम्, ई-मेल। इदानीं चिन्तयामः यत् अध्यापक शिक्षायां सूचनां सम्प्रेषण तकनीकेः अनुप्रयोगः कथं क्रियते–

1. कौशलानां विकासीकरणे शिक्षकं प्रति सूचनासम्प्रसारणं तथा विद्यालयप्रबन्धनं प्रति चेतनाप्रदानम्।
2. मूल्याङ्कनपद्धतौ नवीनीकरणाय।
3. परीक्षककार्येषु संगणकयन्त्रमाध्यमेन परीक्षा आवेदनपत्र पूरणार्थम्, परीक्षापरिणामगणनार्थम्, अङ्कतालिका निर्माणार्थम्।
4. शोधकार्यनिमित्तम्।
5. पुस्तकालय सम्बन्धी सर्वाः सूचनाः संगणकमाध्यमेन सरलतया प्राप्तुं शक्याः।
6. डिजिटल पुस्तकालयप्रयोगे दक्षता सम्पादनार्थम्।
7. पुस्तकप्रकाशनाय, E-पुस्तक पठनाय।
8. चलदूरवाणी द्वारा अधिगम।
9. मल्टीमीडिया एजूकेशन सिस्टम अर्थात् बहुविकल्पीय शिक्षा व्यवस्था निर्माणार्थम्।
10. मुक्तपत्राचार कार्यक्रम हेतु।
11. निर्देशन एवं परामर्श हेतु।
12. व्यावसायिकप्रगतिनिमित्तम्।
13. प्रभाविशिक्षणसामग्रयाः निर्माणार्थम्।
14. पाठ्यवस्तुं सरलं रोचकं बोधगम्यजनकञ्च कर्तुम्।
15. विषयस्य प्रभावशालि प्रस्तुतीकणाय।
16. ज्ञानस्य क्रमबद्ध प्रस्तुतीकरणाय।
17. काले श्रमे च न्यूनताऽनयनाय।

**सूचनासम्प्रेषण तकनीकेः साधनानि**-

1. Internet
2. Computer
3. Websites
4. Digital Library
5. E-mail
6. Fax
7. C.D, D.V.D
8. Video conferencing
9. Mobile Phone
10. उपग्रहसंचार
11. शैक्षिक T.V
12. शैक्षिक Radio
13. Audio-Video Aids (All)
14. Software (Various Types)
15. Labs
16. Projector/ ppts
17. Online discussion
18. Face to Face learning
19. Educational Apps (Hangout Meet, Google Classroom)
20. E-Journals, E-Confrence

एवं प्रकारेण एतैः साधनैः सूचना सम्प्रेषण तकनीकेः अनुप्रयोगः अध्यापक शिक्षायामपि क्रियते।

**सन्दर्भग्रन्थाः**-


1. डॉ. आर. ए. शर्मा, अध्यापकशिक्षा एवं प्रशिक्षण तकनीकी, आर. लाल बुक डिपो, मेरठ, 2011।
2. डॉ. जी. सी. भट्टाचार्य, अध्यापक शिक्षा, विनोद पुस्तक मन्दिर, आगरा, 2005।
3. शिरीष पाल सिंह, अध्यापकशिक्षा, A.P.H publishing corporation, New Delhi, 2009.

4. Skinner B.F, Technology of Teaching, International Publishing House Meerut, 1998.
5. Dr. R.A sharma, Teacher Education, Loyal Books Depot-Meerut-(UP), 2005.